कूर्मो गार्त्समदो गृत्समदो वा। वरुणः (१० दुःस्वप्ननाशिनी)। त्रिष्टुप्।

**इ॒दं क॒वेरा॑दि॒त्यस्य॑ स्व॒राजो॒ विश्वा॑नि॒ सान्त्य॒भ्य॑स्तु म॒ह्ना।**

**अति॒ यो म॒न्द्रो य॒जथा॑य दे॒वः सु॑की॒र्तिं भि॑क्षे॒ वरु॑णस्य॒ भूरेः॑॥ २.०२८.०१**

कवेः- क्रान्तदर्शिनः। आदित्यस्य- अखण्डप्रकृतिजस्य। स्वराजः- आत्मप्रकाशस्य वरुणस्यर्ताधिदैवतस्य। मह्ना- महिम्ना। विश्वानि- सर्वाणि। सन्ति- भवन्ति। इदम्- एतच्चित्तभावनम्। अभ्यस्तु- आभिमुख्येन भवतु। यजथाय- यजमानाय। यः। अति- अतीव। मन्द्रः- आनन्दकरः। देवः। भूरेः- तस्य प्रभूतस्य। वरुणस्य- ऋताधिदैवतस्य। सुकीर्तिं- शोभनमन्त्रम्। भिक्षे- याचे ॥१॥

**तव॑ व्र॒ते सु॒भगा॑सः स्याम स्वा॒ध्यो॑ वरुण तुष्टु॒वांसः॑।**

**उ॒पाय॑न उ॒षसां॒ गोम॑तीनाम॒ग्नयो॒ न जर॑माणा॒ अनु॒ द्यून्॥ २.०२८.०२**

गोमतीनाम्- चिद्रश्मियुक्तानाम्। उषसाम्- विद्यानाम्। उपायने- आगमने। अनु द्यून्- दैवप्रज्ञामनुसृत्य। जरमाणाः- इद्धाः। अग्नयः- क्रतवः। न- इव। वयम्। वरुण- हे ऋताधिदैवत। तव- भवतः। व्रते- धर्मे। स्वाध्यः- शोभनध्यानवन्तः। तुष्टुवांसः- स्तुवन्तः। सुभगासः- सौभाग्यवन्तः। स्याम- भवेम ॥२॥

**तव॑ स्याम पु॒रुवीर॑स्य॒ शर्म॑न्नुरु॒शंस॑स्य वरुण प्रणेतः।**

**यू॒यं नः॑ पुत्रा अदितेरदब्धा अ॒भि क्ष॑मध्वं॒ युज्या॑य देवाः॥ २.०२८.०३**

वरुण- ऋताधिदैवत। पुरुवीरस्य- प्रभूतवीर्यसम्पन्नस्य। उरुशंसस्य- श्रुतिप्रसिद्धस्य। प्रणेतः- प्रकर्षनीतियुक्तस्य। तव- भवतः। शर्मन्- भद्रे। स्याम- भवेम। अदितेः पुत्राः- हे

Dr. Ranganji

WEBOLIM

अखण्डप्रकृतिजाः। अदब्धाः- अहिंस्याः। देवाः- हे द्योतनशीलाः। नः- अस्माकम्। युज्याय- आत्मयोगाभिवृद्धये। अभि क्षमध्वम्। सहनशीलत्त्वेनात्मयोगं वर्धयतेति भावः॥३॥

**प्र सीमादित्यो असृजद्विधर्ताँ ऋतं सिन्धवो वरुणस्य यन्ति।**

**न श्राम्यन्ति न वि मुचन्त्येते वयो न पप्तू रघुया परिज्मन्॥ २.०२८.०४**

सीम्- सर्वतः। आदित्यः- अखण्डप्रकृतिजः। विधर्ता- धारक आत्मसूर्यः। प्र- प्रकर्षेण। असृजत्- अपो मूलशक्तिधाराः ससर्ज। सिन्धवः- ता मूलशक्तिधाराः। वरुणस्य ऋतम्- प्रकृतिनियतिम्। यन्ति- सरन्ति। न। श्राम्यन्ति- श्रान्तिं प्राप्नुवन्ति। न। वि मुचन्ति- उपरता भवन्ति। एते- आपः। वयः- पक्षिणः। न- इव। पप्तुः- पतन्ति। रघुया- लाघवेन। परिज्मन्- परितः सरन्ति॥४॥

**वि मच्छ्रथाय रशनामिवाग ऋध्याम ते वरुण खामृतस्य।**

**मा तन्तुश्छेदि वयतो धियं मे मा मात्रा शार्यपसः पुर ऋतोः॥ २.०२८.०५**

मत्- मत्तः। रशनाम्- पाशम्। इव। आगः- अघमृतविरोधम्। वि श्रथय- विश्लेषय। वरुण- ऋताधिदैवत। ते- तव। ऋतस्य- प्रकृतिनियतिभूतसत्यस्य। खाम्- प्रवाहरूपिणीं नदीम्। खा इति नदीनाम। ऋध्याम- प्राप्नुयाम। वयतः- सन्तन्वतो मम। तन्तुः- धर्मतन्तुः। मा छेदि- मा छिन्नो भवतु। मे- मम। धियम्- चित्तधारणां धारय। ऋतोः पुरा- उचितकालपूर्वम्। अपसः- अस्मज्जीवोदकस्य। मात्रा- रूपम्। मा शारि- मा शीर्णं भवतु॥५॥

**अपो सु म्यक्ष वरुण भियसं मत्सम्राळृतावोऽनु मा गृभाय।**

**दामेव वत्साद्वि मुमुग्ध्यंहो नहि त्वदारे निमिषश्चनेशे॥ २.०२८.०६**

वरुण- ऋताधिदैवत। मत्- मत्तः। भियसम्- भयम्। सु- सुष्ठु। अपो म्यक्ष- अपगमय। ऋतावः- प्रकृतिनियतिभूत। सम्राट्- स्वामी सन्। मा- माम्। अनु गृभाय- अनुगृह्णीष्व। वत्सात्-

Dr.Rangaji
WEBOLIM

बद्धाद्वत्सात्। दामेव- पाशमिव। अंहः- अघमृतविरोधम्। मुमुग्धि- मत्तो विमुञ्च। त्वदारे- त्वत्तो दूरस्थः। ऋतविरोधीति भावः। निमिषश्चन- निमेषमात्रमपि। नहि ईशे- अस्मान्नेष्टे ॥६॥

**मा नो॑ व॒धैर्व॑रुण॒ ये त॑ इ॒ष्टावेनः॑ कृ॒ण्वन्त॑मसुर भ्री॒णन्ति॑।**
**मा ज्योति॑षः प्रवस॒थानि॑ गन्म॒ वि षू मृधः॑ शिश्रथो जी॒वसे॑ नः॥ २.०२८.०७**

असुर- प्राणद। वरुण- ऋताधिदैवत। ते- तव। इष्टौ- सदेषणायाम्। एनः- अघम्। कृण्वन्तम्- कुर्वन्तम्। ये- यानि तव प्रहरणानि। भ्रीणन्ति- हिंसन्ति। भ्रीष् हिंसायाम्। वधैः- तैः प्रहरणैः। नः- अस्मान्। मा- मा हिंसीः। ज्योतिषः- आत्मप्रकाशात्। प्रवसथानि- दूरम्। मा गन्म- मा वयं गच्छेम। नः- अस्माकम्। जीवसे- उज्जीवनाय। मृधः- हिंसकानुपासनान्तरायान्। सु- सुष्ठु। वि शिश्रथः- विश्लेषय ॥७॥

**नमः॑ पु॒रा ते॑ वरुणो॒त नू॒नमु॒ताप॒रं तु॑विजात ब्रवाम।**
**त्वे हि कं॒ पर्व॑ते॒ न श्रि॒तान्यप्र॑च्युतानि दूळभ व्र॒तानि॑॥ २.०२८.०८**

पुरा- पूर्वमपि। वरुण- ऋताधिदैवत। ते- तुभ्यम्। नमः- वन्दनमकरवाम। उत- अपि च। नूनम्- अद्यापि। नमः- वन्दनं कुर्मः। तुविजात- बहुधावतीर्ण। अपरम्- भाविकालेपि। ब्रवाम- नमस्कारं ब्रवाम। त्वे- त्वयि। हि- खलु। पर्वते- गिरौ। न- शिखराणीव। दूळभ- अहिंस्य। अप्रच्युतानि- अभ्रष्टाः। व्रतानि- धर्माः। श्रितानि- श्रिताः ॥८॥

**पर॑ ऋ॒णा सा॑वी॒रध॒ मत्कृ॑तानि॒ माहं रा॑जन्न॒न्यकृ॑तेन भोजम्।**
**अव्यु॑ष्टा॒ इन्नु भूय॑सीरु॒षास॒ आ नो॑ जी॒वान्व॑रुण॒ तासु॑ शाधि॥ २.०२८.०९**

अध- अधुना। मत्कृतानि- मया कृतानि। ऋणानि- दिव्यपैतृकादीनि ऋणानि। परा सावीः- पराचीनं प्रेरय। दूरं गमय। नाशयेति भावः। राजन्- स्वामिन्। अहम्। अन्यकृतेन-

Dr. Rangaji
WEBOLIM

अन्यसम्पादनेन। मा भोजम्- भोगं लभेयम्। भूयसीः- बह्व्यः। उषसः- विद्याः। अव्युष्टाः- मया अननुभूताः। वरुण- ऋताधिदैवत। जीवान्। नः- अस्मान्। तासु। शाधि- अनुशाधि ॥९॥

**यो मे राजन्युज्यो वा सखा वा स्वप्ने भयं भीरवे मह्यमाह।**
**स्तेनो वा यो दिप्सति नो वृको वा त्वं तस्माद्वरुण पाह्यस्मान्॥ २.०२८.१०**

राजन्- स्वामिन्। मे- मम। स्वप्ने- स्वापे तन्द्रायाम्। युज्यः- योगयुक्त आचार्यः। वा। सखा- सुहृद्वा। भीरवे- प्रकृतिनियतिविरोधफलाख्यानर्थज्ञाय। मह्यम्- मे। भयम्- प्रकृतिनियतिविरोधाख्यक्लेशम्। आह- अवदत्। स्तेनः- चोरः। वा। यः। वृकः- हिंसकः। वा। नः- अस्मान्। दिप्सति- जिघांसति। त्वम्। वरुण। तस्मात्- अमुष्माच्चोरहिंसातन्द्राभावनातः। पाहि- रक्ष ॥१०॥

**माहं मघोनो वरुण प्रियस्य भूरिदाव्न आ विदं शूनमापेः।**
**मा रायो राजन्सुयमादव स्थां बृहद्वदेम विदथे सुवीराः॥ २.०२८.११**

पूर्वं व्याख्यातम् ॥११॥

Dr. Rangan
WEBOLIM